# एकीभाव स्तोत्रम्

*( श्रीमदाचार्यवादिराजदेवप्रणीतम् )*

एकीभावं गत इव मया यः स्वयं कर्म बन्धो,
घोरं दुःखं भव भव गतो दुर्निवारः करोति।
तस्याप्यस्य त्वयि जिन रवे भक्तिरुन्मुक्तये चेत्,
जेतुं शक्यो भवति न तया कोऽवरस्तापहेतुः॥१॥

ज्योतीरूपं दुरितं निवह ध्वान्त विध्वंस हेतुं,
त्वामेवाहुर्जिनवर चिरं तत्त्व विद्याभियुक्ताः।
चेतोवासे भवसि च मम स्फार मुद्भासमान
स्तस्मिन्नंहः कथमिव तमो वस्तुतो वस्तुमीष्टे॥२॥

आनन्दाश्रु-स्नपित वदनं गद्गदं चाभिजल्पन्,
यश्चायेत त्वयि दृढ मनाः स्तोत्र् मन्त्रैर्भवन्तम्।
तस्याभ्यस्तादपि च सुचिरं देह वल्मीक मध्यान,
निष्कास्यन्ते विविध विषम व्याधयः काद्रवेयाः॥३॥

प्रागेवेह त्रिदिव भवनादेष्यता-भव्य-पुण्यात्,
पृथ्वी चक्रं कनकमयतां देव निन्ये त्वयेदम्।
ध्यान द्वारं मम रुचिकरं स्वान्त गेहं प्रविष्टस
तत्कि चित्रं जिन वपुरिदं यत्सुवर्णीकरोषि॥४॥

लोकस्यैकस्त्वमसि भगवन्निर्निमित्तोन बन्धु
स्त्वय्येवासौ सकल विषया शक्तिरप्रत्यनीका।
भक्ति स्फीतां चिरमधिवसन्मामिकां चित्त शय्यां,
मय्युत्पन्नं कथमिव ततः क्लेश यूथं सहेथाः॥५॥

जन्माटव्यां कथमपि मया देव दीर्घं भ्रमित्वा,
प्राप्तैवेयं तव नय कथा स्फार पीयूष वापी।

तस्या मध्ये हिमकर हिम व्यूह शीते नितान्तं,
निर्मग्नं मां न जहति कथं दुःख दावोपतापाः॥६॥

पादन्यासादपि च पुनतो यात्रया ते त्रिलोकीं,
हेमाभासो भक्ति सुरभिः श्रीनिवासश्च पद्मः।
सर्वङ्गेण स्पृशति भगवंस्त्वय्यशेषं मनो मे,
श्रेयः किं तत्स्वयमहरहर्यन्न मामभ्युपैति॥७॥

पश्चन्तं त्वद्वचनममृतं भक्ति-पात्र्या-पिबन्तं,
कर्मारण्यात्पुरुषमसमानन्द धाम प्रविष्टम्।
त्वां दुर्वार स्मर मद हरं त्वत्प्रसादैक भूमिं,
क्रूराकाराः कथमिव रुजा कण्टका निर्लुठन्ति॥८॥

पाषाणात्मा तदितरसमः केवलं रत्न मूर्ति
र्मानस्तम्भो भवति च परस्तादृशो रत्न वर्गः।
दृष्टि प्राप्तो हरति स कथं मान रोगं नराणां,
प्रत्यासत्तिर्यदि न भवतस्तस्य तच्छक्ति हेतुः॥९॥

हृद्यः प्राप्तो मरुदपि भवन्मूर्ति शैलोपवाही,
सद्यः पुंसां निरवधि रुजा धूलिबन्धं धुनोति।
ध्यानाहूतो हृदय कमलं यस्य तु त्वं प्रविष्ट
स्तस्याशक्यः क इह भुवने देव लोकोपकारः॥१०॥

जानासि त्वं मम भव-भवे यच्च यादृक्च दुःखं,
जातं यस्य स्मरणमपि मे शस्त्रवन्निष्पिनष्टि।
त्वं सर्वेशः सकृप इति च त्वामुपेतोऽस्मि भक्त्या,
यत्कर्तव्यं तदिह विषये देव एव प्रमाणम्॥११॥

प्रापद्दैवं तव नुति पदैर्जीवकेनोपदिष्टैः,
पापाचारी मरण समये सारमेयोऽपि सौख्यम्।

कः सन्देहो यदुपलभते वासव श्री प्रभुत्वं,
जल्पञ्जाप्यैर्मणिभिरमलैस्त्वन्नमस्कार चक्रम्॥१२॥

शुद्धे ज्ञाने शुचिनि चरिते सत्यपि त्वय्यनीचा,
भक्तिर्नो चेदनवधि सुखावञ्चिका कुञ्चिकेयम्।
शक्योद्धाटं भवति हि कथं मुक्ति कामस्य पुंसो,
मुक्ति-द्वारं परिदृढ़-महामोह-मुद्रा-कवाटम्॥१३॥

प्रच्छन्नः खल्वयमघमयैरन्धकारैः समन्तात्,
पन्था मुक्तेः स्थपुटित पदः क्लेश गर्तैरगाधैः।
तत्कस्तेन व्रजति सुखतो देव तत्त्वावभासी,
यद्यग्रेऽग्रे न भवति भवद्भारती रत्न दीपः॥१४॥

आत्म-ज्योतिर्निधिरनवधिर्द्रष्टुरानन्द हेतुः
कर्म क्षोणी पटल पिहितो योऽनवाप्यः परेषाम्।
हस्ते कुर्वन्त्यनतिचिरतस्तं भवद्भक्तिभाजः,
स्तोत्रै र्बद्ध प्रकृति परुषोद्दाम धात्री खनित्रैः॥१५॥

प्रत्युत्पन्ना नय हिमगिरेरायता चामृताब्धेः,
या देव त्वत्पद कमलयोः संगता भक्ति गंङ्गा।
चेतस्तस्यां मम रुचि वशादाप्लुतं क्षालितांहः,
कल्माषं यद्भवति किमियं देव सन्देह भूमिः॥१६॥

प्रादुर्भूत स्थिर पद सुख त्वामनुध्यायतो मे,
त्वय्येवाहं स इति मतिरुत्पद्यते निर्विकल्पा।
मिथ्यैवेयं तदपि तनुते तृप्तिमभ्रेषरूपां,
दोषात्मानोऽप्यभिमत फलास्त्वत्प्रसादाद् भवन्ति॥१७॥

मिथ्यावादं मलमपनुदन्सप्तभङ्गी तरंगै
र्वागम्भोधिर्भुवनमखिलं देव पर्येति यस्ते।

तस्यावृत्तिं सपदि विबुधाश्चेतसैवाचलेन,
व्यातन्वन्तः सुचिरममृतासेवया तृप्नुवन्ति॥१८॥

आहार्येभ्यः स्पृहयति परं चः स्वभावादहृद्यः,
शस्त्र ग्राही भवति सततं वैरिणा यश्च शक्यः।
सर्वांगेषु त्वमसि सुभगस्त्वं न शक्यः परेषां,
तत्किं भूषा वसन कुसुमैः किं च शस्त्रैरुदस्त्रैः॥१९॥

इन्द्रः सेवां तव सुकुरुतां किं तया श्लाघनं ते,
तस्यैवेयं भव-लय-करी श्लाघ्यतामातनोति।
त्वं निस्तारी जनन-जलधेः सिद्धि कान्ता पतिस्त्वं,
त्वं लोकानां प्रभुरिति तव श्लाघ्यते स्तोत्रमित्थम्॥२०॥

वृत्तिर्वाचामपर सदृशी न त्वमन्येन तुल्यः,
स्तुत्युद्गाराः कथमिव ततस्त्वय्यमी न क्रमन्ते।
मैवं भूवंस्तदपि भगवन्भक्ति पीयूष पुष्टा,
स्ते भव्यानामभिमत फलाः पारिजाता भवन्ति॥२१॥

कोपावेशो न तव न तव क्वापि देव प्रसादो,
व्याप्तं चेतस्तव हि परमोपेक्षयैवानपेक्षम्।
आज्ञावश्यं तदपि भुवनं सन्निधि वैंर-हारी,
क्वैवंभूतं भुवन तिलकं प्राभवं त्वत्परेषु॥२२॥

देव! स्तोतुं त्रिदिव गणिका-मण्डलीगीत-कीर्तिं,
तोतूर्ति त्वां सकल-विषय-ज्ञान-मूर्तिं जनो यः।
तस्य क्षेमं न पदमतटो जातु जाहूर्ति पन्थाः
तत्त्वग्रन्थ स्मरण विषये नैष मोमूर्ति मर्त्यः॥२३॥

चित्ते कुर्वन्निरवधि सुख ज्ञान दृग्वीर्य रूपं,
देव! त्वां यः समय नियमादाऽऽदरेण स्तवीति।

श्रेयोमार्ग स खुल सुकृती तावता पूरयित्वा,
कल्याणानां भवति विषयः पञ्चधा पञ्चितानाम्॥२४॥

शार्दूलविक्रीडित छन्द

भक्ति प्रह्व महेन्द्र पूजित पद त्वत्कीर्तने न क्षमाः,
सूक्ष्म ज्ञान दृशोऽपि संयमभृतः के हन्त मन्दा वयम्।
अस्माभिः स्तवन च्छलेन तु परस्त्वय्यादरस्तन्यते,
स्वात्माधीन सुखैषिणां स खुल नः कल्याण कल्पद्रुमः॥२५॥

स्वागता छन्द

वादिराजमनु शाब्दिक लोकेवादिराजमनु तार्किक सिंहः।
वादिराजमनु काव्यकृतस्ते वादिराजमनु भव्य सहायः॥२६॥